This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M131 विषय पूजाविधान.
नाव. पंचदशललितामाळ.
लेखक/लिपीकार —.
पृष्ठ ५ काळ — पूर्ण/~~अपूर्ण~~

(43)

(25)

श्रीगणेशाय नमः॥ अथ पंचदशाललितामालामंत्रप्रयोगः॥ शुद्धशक्तिमालामंत्रस्य उ-
पस्थेंद्रियाधिष्ठायि वरुणादित्य ऋषिः। गायत्री छंदः। सात्विक ककारभट्टारकपीठस्थितका-
५ मेश्वरांकनिलया कामेश्वरी ललितामहाभट्टारिका देवता॥ खड्गसिद्ध्यै विनियोगः। तादृशं
खड्गमाप्नोति येन हस्तास्थितेन वै॥ अष्टादशमहाद्वीपसाम्राज्यभोक्ता भविष्यति १ ऐं ह्रीं श्रीं
ॐ नमस्त्रिपुरसुंदरि हृदयदेवि शिरोदेवि शिखादेवि कवचदेवि नेत्रदेवि अस्त्रदेवि कामेश्व-
६ त्ति रि इत्यादि महामहाश्रीचक्रनगरसाम्राज्ञि नमस्ते स्वाहा। श्रीं ह्रीं ऐं इति शुद्धशक्तिमालामं-
त्रः। अस्य श्रीनमोंतशक्तिमालामंत्रस्य। पायेंद्रियाधिष्ठायि मित्रादित्य ऋषिः। उष्णिक्
छंदः। भोगप्रदैकारभट्टारकपीठस्थितैकवीरशिवांकनिलया ललितामहाभट्टारिका देवता।
पादुकासिद्ध्यै विनियोगः। तादृशं पादुकायुग्ममाप्नोति तव भक्तिमान्। यदाक्रमणमात्रेण क्षणा-
त्त्रिभुवनभ्रमः। ऐं ह्रीं श्रीं ॐ नमः त्रिपुरसुंदर्यै नमः। हृदयदेव्यै० शिरोदेव्यै० इत्यादि त्रैलो-
क्यमोहनचक्रस्वामिन्यै० प्रकटयोगिन्यै० एवमावरणनवकेषु सर्वमालामंत्रेषु भिन्ननामानि।
महामहाश्रीचक्रनगरसाम्राज्ञे नमः नमस्ते स्वाहा॥ श्रीं ह्रीं ऐं। केचित्पादुकां पूजयामि नमः। इति

न वाक्षराणि योजयंति। इति नमोंतमालामंत्रः अस्य श्रीस्वाहांतशक्तिमालामंत्रस्य पादेंद्रियाधि
३ ष्ठायिधा आदित्यऋषिः। अनुष्टुप्छंदः। मोक्षप्रदे कारभट्टारकपीठस्थितकामेश्वरांकनिल
ये श्वरीललितामहाभट्टारिकादेवता। अंजनसिद्धौ विनियोगः। सिध्यांजनं समासाद्य ते नीज
नित लोचनः। निधिं पश्यति सर्वत्र भक्तस्त्वत्समृद्धिमान्। ऐं क्लीं श्रीं ॐ नमस्त्रिपुरसुंद
र्यै स्वाहा। हृदयदेव्यै स्वाहा। इत्यादि महामहाश्रीचक्रनगरसाम्राज्ञै स्वाहा नमस्ते स्वाहा।
श्रीं क्लीं ऐं इति स्वाहांतमालामंत्रः। अस्य श्रीतर्पणांतशक्तिमालामंत्रस्य॥ पाणींद्रियाधि
ष्ठाय्यर्यमादित्यऋषिः। बृहतीछंदः। सात्त्विककलकारभट्टारकपीठस्थितकामेश्वरांकनि
लयाललिकाललितामहाभट्टारिकादेवता। बिल्वसिद्धौ विनियोगः। बिल्वद्वारमोर्त्स्य पा
पातालतलयोगिनः। वीक्ष्यते भ्योलब्धसिद्धिस्तव भक्तः सुखी भवेत्। ऐं क्लीं श्रीं ॐ नमस्त्रि
पुरसुंदरीं तर्पयामि। हृदयदेवीं तर्पयामी स्यादि। महामहाश्रीचक्रनगरसांम्राज्ञीं तर्पया
मि नमस्ते स्वाहा। श्रीं क्लीं ऐं। इति तर्पणांतमालामंत्रः। अस्य श्रीजयांतशक्तिमालामंत्रस्य। ९
वागेंद्रियाधिष्ठा र्यंशुमानादित्यऋषिः। पंक्तिश्छंदः। सात्त्विकक्लींकारभट्टारपीठस्थितहृद

पश्रीपांकनिलयाहस्लेखाललितामहाभट्टारिकादेवता॥ वाक्सिद्धौ विनियोगः॥ वाक्सिद्धि
र्हि विधा श्रीक्ता शापानुग्रहकारिणी। महाकवित्वरूपा च भक्तस्तेन दृश्यास्वदे। ऐं क्लीं श्रीं ॐ नमस्त्रि
पुरसुंदरि जय जय हृदयदेवि जय जये स्यादि। महामहाश्रीनगरसाम्राज्ञि जय जय नमस्ते स्वाहा॥
श्रीं क्लीं ऐं इति जयांतमालामंत्रः॥ अस्य श्रीशुद्धाशिवमा× चक्र× मालामंत्रस्य। घ्राणेंद्रियाधिष्ठा
यिभगादित्यऋषिः। त्रिष्टुप्छंदः। भोगप्रदह कारभट्टारकपीठस्थितहरलिनीललितामंडि
तांकहलिकोभट्टारकशिवो देवता। देहसिद्धौ विनियोगः। तया सिध्यंति ते भक्तो यच्छरीर
स्य पार्वति। सप्तकांचनगोरस्य कदापि क्वापि नक्षयः। ऐं क्लीं श्रीं ॐ नमस्त्रिपुरसुंदर हृदयदे
व इत्यादि महामहाश्रीचक्रनगरसाम्राजन नमस्ते स्वाहा॥ श्रीं क्लीं ऐं इति शुद्धाशिवमालामं
त्रः॥ अस्य श्रीनमोंतशिवमा[illegible]लामंत्रस्य। रसनेंद्रियाधिष्ठायीशादित्यऋषिः। जगतीछंदः।
मोक्षप्रदसकारभट्टारकपीठस्थितसरस्वतीललितामंडितांकसर्वज्ञभट्टारिकः शिवो दे
वता। लोहसिद्धौ विनियोगः। खड्गं तं हस्तस्पर्शेन लोहो प्यष्टविधः शिवे। कांचनीभाव माप्नो
ति तथा स्याच्छिवतुल्यता॥ ऐं क्लीं श्रीं ॐ नमस्त्रिपुरसुंदराय नमः पादुकां पूजयामि॥ हृदय

देवायनमः १३ इत्यादि। महामहाश्रीचक्रनगरसाम्राज्ञायनमः। पादुकां पूजयामि।। नमस्ते स्वा
हा।। श्रीं ह्रीं ऐं। इति नमोंतत्रिंशवमालामंत्रः।। अस्य श्रीस्वाहांतत्रिंशवमालामंत्रस्य। द
२ गेंद्रियाधिष्ठायिविवस्वानादित्यऋषिः। अतिजगतीछंदः। तामससककारभट्टारकपीठ
स्थितकमलाललितामंडितांककमलमर्दनभट्टारकशिवो देवता।। अणिमाद्यष्टसिद्धौ
विनियोगः। ये स्थाघ्र्युत्वमहात्वाद्याः स्वेछमात्रेण कल्पिताः।। तव भक्तशरीरशा पाते स्युर्नैस
६५ र्गिकागुणाः।। ऐं ह्रीं श्रीं ॐ नमस्त्रिपुरसुंदरास्वाहा।। हृदयदेवायस्वाहा। इत्यादि महामहा
श्रीचक्रनगरसाम्राज्ञायस्वाहा। नमस्ते स्वाहा। श्रीं ह्रीं ऐं इति स्वाहांतत्रिंशवमालामंत्रः।। अ
स्य श्रीतर्पणांतत्रिंशवमालामंत्रस्य।। त्वगेंद्रियाधिष्ठायीपूषादित्यऋषिः।। शक्करीछंदः। भो
गप्रदहकारभट्टारकपीठस्थितहरवल्लभाललितामंडितांकहरनाथभट्टारकः शिवो देव
ता।। वश्यसिद्धौ विनियोगः।। शरीरमर्धं प्राणांश्च निवेद्य निजभक्त्यवते।। तव भक्तं निषेवंते व
श्रीभूयन्नृपादयः। ऐं ह्रीं श्रीं ॐ नमस्त्रिपुरसुंदरं तर्पयामि।। हृदयदेवं तर्पयामीत्यादि महामहाश्री
चक्रनगरसाम्राजं तर्पयामि नमस्ते स्वाहा।। श्रीं ह्रीं ऐं इति तर्पणांतत्रिंशमालामंत्रः।। अस्य श्रीज २

६२ चे१

यांतत्रिंशवमालामंत्रस्य।। श्रोत्रेंद्रियाधिष्ठायिसवित्रादित्यऋषिः।। अतिशक्करीछंदः।। तामसल
कारभट्टारकपीठस्थितलक्ष्मीललितामंडितांकललजिह्वोभट्टारकशिवो देवता।। आकर्षण
सिद्धौ विनियोगः।। लोहप्रकारसंगुप्तानिगडैर्यंत्रिता अपि। त्वद्भक्तैः कृष्यमाणाश्च स्वसमायांत्येव
योषितः।। ऐं ह्रीं श्रीं ॐ नमस्त्रिपुरसुंदरंजयजयहृदयदेवजयजयेत्यादि महामहाश्रीचक्रनगर
साम्राजंजयजयनमस्ते स्वाहा। श्रीं ह्रीं ऐं।। इति जयांतत्रिंशवमालामंत्रः।। अस्य श्रीशुद्धोंमाला भैंकर
मंत्रस्य। अहंकाराधिष्ठायित्वाष्ट्रादित्यऋषिः। अष्टीछंदः। तामसह्रींकारभट्टारकपीठस्थिते
श्वरशिवांकनिलयाहरिणीललितामंडितांकेहृदयेश्वरो महाभट्टारको देवते।। मोहनसिद्धौ वि
नियोगः। अंबिके तव भक्तानामवलोकनमात्रतः। रूसाहूसविमूढाः स्युर्नेरानार्यो नृपादयः।
ऐं ह्रीं श्रीं।। ॐ नमस्त्रिपुरसुंदरि। त्रिपुरसुंदरहृदयदेवि हृदयदेव्यादि महामहाश्रीच
क्रनगरसाम्राज्ञि महामहाश्रीचक्रनगरसाम्राज्ञ नमस्ते स्वा श्रीं ह्रीं ऐं।। इत्युभयभु हा
दु मालामंत्रः।। अस्य श्रीनमोंतोभयमालामंत्रस्य।। बुध्याधिष्ठायिविष्णुआदित्यऋ
स्य२ षिः।। अष्टीछंदः। मोक्षप्रदसकारभट्टारकपीठस्थितेश्वरशिवांकनिलयासकलज
ननीललितामंडितांकसकलेश्वरो महाभट्टारको देवते।। स्तंभनसिद्धौ विनियोगः।। दे

द्वि

त्रिस्वद्रुक्रमालो वश्यत्रारीरेषु चेतसां॥ स्तंभनाद्वैरिणास्ताव्या स्वस्वकार्यपराङ्मुखाः॥
३२ ऐं ह्रीं श्रीं ॐ नमस्त्रिपुरसुंदर्यै नमः पादुकां पूजयामि त्रिपुरसुंदराय नमः १ हृदयदे
व्यै १ हृदयदेवाय १ इत्यादि महामहाश्रीचक्रनगरसाम्राज्ञे १ महामहाश्रीचक्रन
४ह्री गरसाम्राजाय १ नमस्ते स्वाहा ऐं ह्रीं श्रीं॥ इति नमोंतोभयमालामंत्रः॥ अस्य श्री स्वाहां
तमिथुनमालामंत्रस्य॥ चेतोधिष्ठायि ब्रह्माऋषिः॥ धृतिछंदः॥ राजस ककारभट्टा
रकपीठस्थित करुणाकरशिवांकनिलया कामकोटिललितामंडितां क करुणा
करमहाभट्टारको देवते॥ पुरुषार्थसिध्यो विनियोगः॥ धर्मश्चार्थश्च कामश्च मोक्ष
श्चेति चतुष्टयं॥ तव भक्तः स्वभक्तेभ्यः प्रयच्छत्यप्रयासतः॥ ऐं ह्रीं श्रीं ओं नमस्त्रि
पुरसुंदर्यै स्वाहा। त्रिपुरसुंदराय २ हृदयदेव्यै २ हृदयदेवाय २ इत्यादि महामहा
श्रीचक्रनगरसाम्राज्ञे स्वाहा महामहाश्रीचक्रनगरसाम्राजाय स्वाहा नमस्ते
स्वाहा श्रीं ह्रीं ऐं इति स्वाहांतोभयमालामंत्रः॥ अस्य श्री तर्पणांत मिथुनमाला
मंत्रस्य॥ मकुंदाधिष्ठायि विष्णुऋषिः॥ अतिधृतिश्छंदः॥ राजस लकारपीठस्थित २२
लावण्यशिवांकनिलया लीलावतीललितामंडितां कलावण्यनाथभट्टारको देवते॥

१६ आनंदसिध्यो विनियोगः॥ आलोकिकं लोकिकं चेत्यानंदद्वितयं सदा॥ सुलभं परमे
शानि त्वत्सादो भजतां तर्पणात्॥ ऐं ह्रीं श्रीं ॐ नमस्त्रिपुरसुंदरीं तर्पयामि त्रिपुरसुंदरं। ४ हृदय
देवीं ४ हृदयदेवं ४ इत्यादि महामहाश्रीचक्रनगरसाम्राज्ञीं ४ महामहाश्रीचक्रनगरसाम्रा
जं तर्पयामि नमस्ते स्वाहा श्रीं ह्रीं ऐं इति तर्पणांतोभयमालामंत्रः॥ अस्य श्री जयांत मिथुन
मालामंत्रस्य। पुरुषाधिष्ठायि शिवऋषिः॥ कृतिश्छंदः॥ राजस ह्रींकारपीठस्थित शिवांकनि
यय लया हरेश्वरी ललितामंडितां क हिरैवक्रम महाभट्टारको देवते॥ मोक्षसिध्यो विनियोगः॥
या भोगदायिनी देवी जीवन्मुक्तिः प्रदा न सा॥ मोक्षदा तु न भोगाय ललिता तूभयप्रदा॥ ऐं ह्रीं श्रीं
ॐ नमस्त्रिपुरसुंदरि जय जय त्रिपुरसुंदर जय जय हृदयदेवि जय जय हृदयदेव जय जयेत्या
दि महामहाश्रीचक्रनगरसाम्राज्ञि जय जय महामहाश्रीचक्रनगरसाम्राज जय जय नमस्ते
स्वाहा श्रीं ह्रीं ऐं॥ इति मिथुनजयांतमालामंत्रः॥ ॥ इति पंचदशमालामंत्रः॥ श्रीत्रिपुर
सुंदर्यै नमः॥ शक्तिमाला पंचधा स्याच्छिवमालापि तादृशी॥ द्वंद्वमालापि तादृक्स्यादेवं
पंचदशात्मिका॥ शुद्धा नमोंता स्वाहांता तर्पणांता जयांतिका॥ प्रदेधयः पंचधास्युर्मालासु

निखिलास्वपि॥ एवं पंचविधा योगो मालानां चिंतये भवेत्॥ अतः पंचदशाख्याता माला च
श्रीललितामनोः॥ [illegible]॥ ॥ त्रिपुरसुंदर्यादिसम्प्राप्ति इत्यंतैः एकाशीत्यधिकशत
५ संख्याकैर्नामभिः प्रातिपदिकैः तत्संख्यया पल्लवाणि निर्ज्ञेयानि॥ इति शिवं॥ ॥

```
[OrderDescription]
,CREATED=09.08.19 13:57
,TRANSFERRED=2019/08/09 at 14:12:31
,PAGES=6
,TYPE=STD
,NAME=S0001426
,Book Name=M-131-PANCHDSHLALITAMALA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,
```